# चर्मकारस्य विश्वासः

एकदा नारदमुनिः पृथवीलोके हरिनामकीर्तनं कुर्वन् सर्वत्र भ्रमणं करोति स्म। एकत्र सः एकं ब्राह्मणं पश्यति। सः ब्राह्मणः पाण्डित्याभिमानी। सः गर्वेण मुनिवरं पृच्छति “मुनिवर! यदा भवान् वैकुण्ठं गच्छति, कृपया नारायणं पृच्छतु अहं तं कदा प्राप्नोमि” इति। मुनिवरः “अस्तु, पृच्छामि” इति उक्त्वा ततः गच्छति।

पुनः सः एकं चर्मकारं पश्यति। चर्मकारः विनम्रः। सः विनयेन मुनिवरं पृच्छति “मुनिवर! यदा भवान् वैकुण्ठं गच्छति, कृपया नारायणं पृच्छतु अहं तं कदा प्राप्नोमि” इति। मुनिवरः “अस्तु, पृच्छामि” इति उक्त्वा ततः अपि गच्छति।

नारदमुनिः वैकुण्ठं गच्छति। नारायणाय सर्वं निवेदयति। नारायणः कथयति “ब्राह्मणः शतजन्मानन्तरं मां प्राप्नोति। किन्तु चर्मकाराय एकम् एव जन्म अवशेषम्” इति। नारदमुनिः चिन्तयति “एवं कथं शक्यते?” इति। नारायणः एकम् उपायं करोति। सः मुनिवरं वदति “यदि ब्राह्मणः अथवा चर्मकारः मम विषये पृच्छति चेत् वदतु अहं सूचिरन्ध्रतः गजं सूत्रयन् अस्मि” इति।

नारदमुनिः ब्राह्मणं नारायणस्य वचनं कथयति। सः वदति “भवान् शतजन्मानन्तरं नारायणं प्राप्नोति” इति। ब्राह्मणः विश्वासम् एव न करोति। सः चिन्तयति मुनिवरः नारायणं न दृष्टवान् एव। सः पृच्छति “यदि भवान् नारायणं दृष्टवान् चेत् वदतु सः तदा किं कुर्वन् आसीत्?” इति। नारदमुनिः वदति “नारायणः सूचिरन्ध्रतः गजं सूत्रयन् आसीत्” इति। ब्राह्मणः “कथं शक्यते” इति चिन्तयन् पुनः विश्वासं न करोति। सः पुनः चिन्तयति मुनिवरः नारायणं न दृष्टवान् एव।

ततः नारदमुनिः चर्मकारं पश्यति। तं वदति “भोः चर्मकार! एतत् भवतः अन्तिमं जन्म। अनन्तरं भवान् नारायणं प्राप्नोति” इति। चर्मकारः सन्तुष्टः भवति। सः आनन्देन पृच्छति “अहो! यदा भवान् नारायणं दृष्टवान् सः किं कुर्वन् आसीत्?” इति। नारदमुनिः वदति “नारायणः सूचिरन्ध्रतः गजं सूत्रयन् आसीत्” इति। चर्मकारः इतोऽपि आनन्दम् अनुभवति। तत् दृष्ट्वा मुनिवरः विस्मितः भवति। सः चर्मकारं पृच्छति “भवान् कथं विश्वासं करोति?” इति। चर्मकारः सन्तोषेण वदति “अहो! कथं न करोमि? पश्यतु, कियत् बृहत् एषः वटवृक्षः। यदि एकस्मात् लघुबीजतः इयत् बृहत् वृक्षः भवितुं शक्नोति चेत् नारायणः तु किमपि कर्तुं शक्नोति” इति।

द्वयोः प्रतिक्रियां दृष्ट्वा मुनिवरस्य शङ्कायाः निवारणं भवति।

अहो चर्मकारस्य विश्वासः!

अभिप्रायः

ईश्वरं प्रति विश्वासः आवश्यकः। ततः एव वयं तस्य कृपां प्राप्नुमः। ततः एव वयम् ईश्वरम् अपि प्राप्नुमः।

-श्रीलप्रभुपादः

शब्दमञ्जूषा

पाण्डित्याभिमानी = proud of one's learning, चर्मकारः = cobbler, पृच्छतु = to ask, विनम्रः = humble, निवेदयति = to express, प्राप्नोमि = to meet / to get, सूचिरन्ध्रम् = eye of the needle, गजः = elephant, सूत्रयन् = to thread, विस्मितः = surprised.